# Sundararaja Kavacha Stotram

# સુન્દરરાજકવચસ્તોત્રમ્

## Document Information

Text title : Sundararaja Kavacha Stotram

File name : sundararAjakavachastotram.itx

Category : deities_misc, kavacha, stotra

Location : doc_deities_misc

Proofread by : Saritha Sangameswaran

Latest update : May 27, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 27, 2026

*sanskritdocuments.org*

# Sundararaja Kavacha Stotram

# સુન્દરરાજકવચસ્તોત્રમ્

॥ શ્રીરસ્તુ ॥ શ્રીબ્રહ્મપ્રોક્તમ્ ।
॥ શ્રીમત્સુન્દરરાજકવચસ્તોત્રમહામન્ત્રમ્ ॥

॥ અથ શ્રીસુન્દરરાજકવચસ્તોત્રપ્રારમ્ભઃ ॥

વન્દે સુન્દરરાજાનમિન્દિરાભૂમિનાયકમ્ ।
બૃન્દારકગણૈર્વન્દ્યઞ્ચિન્તિતાભીષ્ટદાયકમ્ ॥ ૧॥

સોમચ્છન્દવિમાનસ્થમ્મધ્યે તુરગવાહનમ્ ।
મણ્ડૂકવરદન્દેવં સુન્દરં પ્રણતોસ્મ્યહમ્ ॥ ૨॥

સુન્દરાયતભુજં ભજામહે વૃક્ષષણ્ડમયમદ્રિમાસ્થિતમ્ ।
યત્ર સુપ્રથિતનૂ પુરાપગાતીર્થમર્થિત ફલપ્રદં વિદુઃ ॥

॥ અથ શ્રીસુન્દરરાજકવચમહામન્ત્રમ્ ॥

અસ્ય શ્રીસુન્દરરાજકવચસ્તોત્રમહામન્ત્રસ્ય, વિખનસબ્રહ્મર્ષિઃ,
અનુષ્ટુપ્-ચ્છન્દઃ શ્રીસુન્દરરાજો દેવતા, ૐ બીજમ્, શ્રીં શક્તિઃ,
હ્રીં કીલકમ્, મમ સુન્દરરાજપ્રસાદસિધ્યર્થે જપે વિનિયોગઃ ॥

અથ કરન્યાસઃ ।
ૐ નમો ભગવતે શ્રીસુન્દરરાજાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ નમો ભગવતે શ્રીવૃષભાદ્રિવાસિને તર્જનીભ્યાં નમઃ ।
ૐ નમો ભગવતે દેવશિખામણયે મધ્યમાભ્યાં નમઃ ।
ૐ નમો ભગવતે પરમસ્વામિને અનામિકાભ્યાં નમઃ ।
ૐ નમો ભગવતે પ્રયોગચક્રિણે કનિષ્ઠિકાભ્યં નમઃ ।
ૐ નમો ભગવતે સર્વસમ્પત્કરાય કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
ઇતિ કરન્યાસઃ ।
અથ અઙ્ગન્યાસઃ ।
ૐ નમો ભગવતે શ્રીસુન્દરરાજાય હૃદયાય નમઃ ।

ૐ નમો ભગવતે શ્રીવૃષભાદ્રિવાસિને શિરસે સ્વાહા ।
ૐ નમો ભગવતે દેવશિખામણયે શિખાયૈ વષટ્ ।
ૐ નમો ભગવતે શ્રીપરમસ્વામિને કવચાય હું ।
ૐ નમો ભગવતે પ્રયોગચક્રિણે નેત્રત્રયાય વૌષટ્ ।
ૐ નમો ભગવતે સર્વસમ્પત્કરાય અસ્ત્રાય ફટ્ ।
ભૂર્ભુવસ્સુવરોમિતિદિગ્બન્ધઃ ॥

ઇતિ અઙ્ગન્યાસઃ ।
॥ અથ ધ્યાનમ્ ॥

મઞ્જીરાભ્યાં લસત્પાદં કાઞ્ચ્યા રાજત્કટીતટમ્ ।
શ્રીવત્સહારકેયૂરૈઃ કૌસ્તુભેન વિરાજિતમ્ ॥ ૧॥

યજ્ઞસૂત્રઞ્ચ તુળસીમાલા ધૃતભુજાન્તરમ્ ।
રત્નકુણ્ડલશોભાઢ્ય કર્ણદ્વન્દ્વમનોહરમ્ ॥ ૨॥

સર્વલક્ષણલક્ષિણ્યં સુશીર્ષમકુટોજ્વલમ્ ।
સુન્દરસ્ય ચ સૌન્દર્યં વન્દે સુન્દરનાયકમ્ ॥ ૩॥

પીતામ્બરં વરદશીતલદૃષ્ટિપાત-
માજાનુલમ્બિભુજમાયત કર્ણપાશમ્ ।
શ્રીમન્મહાવનગિરીન્દ્રનિવાસદીક્ષં
લક્ષ્મીધરં કિમપિ વસ્તુ મમાઽવિરસ્તુ ॥ ૪॥

સુન્દરં સુન્દરભુજં પરમસ્વામિનં હરિમ્ ।
શ્રીભૂમિનીળારમણં વૃષાદ્રીશન્નમામ્યહમ્ ॥ ૫॥

॥ અથ રક્ષાવિધિઃ ॥

પ્રાચ્યાં મે સુન્દરઃ પાતુ આગ્નેય્યાં ગરુડધ્વજઃ ।
દક્ષિણે પાતુ દેવેશો નૈરૃત્યાં પાતુ વિશ્વદૃક્ ॥ ૧॥

વારુણ્યાં વરદઃ પાતુ વાયવ્યાં પાતુ વામનઃ ।
ત્રિવિક્રમોત્તરં પાતુ ચૈશાન્યાં પાતુ કેશવઃ ॥ ૨॥

ઊર્ધ્વં મે પાતુ ગોવિન્દઃ હૃષીકેશસ્તથાઽધ્યધઃ ।
પરિતઃ પાતુ મે શાર્ઙ્ગ ચાન્તર્નારાયણો મમ ॥ ૩॥

શેષશાયી શિરઃ પાતુ ફાલં ભક્તજનપ્રિયઃ ।

નાસાં રસાધિપઃ પાતુ શ્રોત્રૌ રાત્રિચરાન્તકઃ ॥ ૪॥

દૃશૌ  મે પુણ્ડરીકાક્ષશ્ચિબુકં કરુણાનિધિઃ ।
દશનાન્પાતુ દૈત્યારિઃ જિહ્વાં વાચં શિખાસ્તથા ॥ ૫॥

પરમેષ્ઠીચ પાત્વોષ્ઠૌ કપોલૌ કરિરક્ષકઃ ।
કણ્ઠં વૈકુણ્ઠવાસી મે વક્ષૌ વૃષગિરીશ્વરઃ ॥ ૬॥

ભુજૌ મે સુન્દરભુજઃ પાણી મે પાર્થસારથિઃ ।
નખાન્પાતુ મહાવીરઃ અમેયાત્માઽઙ્ગુલીર્મમ ॥ ૭॥

પક્ષીન્દ્રવાહનઃ કક્ષૌ કુક્ષિં  ત્રૈલોક્યરક્ષકઃ ।
ક્ષીરાબ્ધિશાયી પાર્શ્વૌ મે પૃષ્ટં મે કમઠીવપુઃ ॥ ૮॥

નાભિં  મે પદ્મનાભશ્ચ કટિં કૈટભનાશનઃ ।
વનાદ્રિનિલયો મધ્યમૂરૂ દામોદરો મમ ॥ ૯॥

જાનુની જન્મહા પાતુ જઙ્ઘે શઙ્ખાસિપદ્મધૃત્ ।
પાદૌ મે પરમસ્વામી શુભાઙ્ગઃ પાતુ મેઽઙ્ગુળીઃ ॥ ૧૦॥

પાષ્ણીં  શતમખસ્તોત્રી નખરાન્મે હિરણ્મયઃ ।
માધવઃ પાતુ મેઽઙ્ગાનિ સર્વદેવશિખામણિઃ ॥ ૧૧॥

ચર્મણ્યસ્થીનિ રોમાણિ માંસાનિ રુધિરાણિ ચ ।
અનન્તઃ પાતુ મે બાહ્યં પરિતોઽભ્યન્તરાણિ ચ ॥ ૧૨॥

શુદ્ધાત્મા દિવસે બુદ્ધિં મઙ્ગલાઙ્ગો મનો મમ ।
વાચં વાણીપતિસ્તુત્યો પ્રાણાન્સુન્દરવલ્લભઃ ॥ ૧૩॥

ઇન્દ્રિયાણિ ચ સર્વાણિ શરીરાણિ હરિર્મમ ।
સૂર્યાત્મા  દિવસે પાતુ સોમાત્મા નિશિ સર્વદા ॥ ૧૪॥

ઉભયો સન્ધ્યયોઃ પાતુ ચોગ્રસિંહ્યોઽસુરાસુહૃત્ ।
વરાહઃ પાતુ ભૂમૌ માં જલે જલચરપ્રભુઃ ॥ ૧૫॥

વિપિને પાતુ ગોપાલઃ શૈલે દાશરથીષુધૃત્ ।
આસ્થાને કામજનકઃ યાત્રાદૌ મે જનાર્દનઃ ॥ ૧૬॥

દિક્ષુ સર્વાસુ કાર્યેષુ સર્વભૂતહિતેરતઃ ।
મિત્રં પાતુ શ્રિયં પાતુ સૌમિત્રેરગ્રજો મમ ॥ ૧૭॥

ભૂતરાક્ષસયક્ષેભ્યઃ ક્ષુદ્રેભ્યઃ પાતુ મૌસલી ।
ક્ષયશૂલાતિસારેભ્યઃ કુષ્ઠેભ્યો ભૂતમારણઃ ॥ ૧૮॥

અપસ્મારજ્વરાદિભ્યઃ પાતુ માં ભક્તવત્સલઃ ।
શાર્ઙ્ગી  ગદાધરઃ પાતુ ચક્રી પાતુ મહાબલઃ ॥ ૧૯॥

બલધ્વંસી ચ મે પાતુ જાગરે શયને સદા ।
ઇત્યાહ ભગવાન્બ્રહ્મ  નારદાય મહાત્મને ॥ ૨૦॥

ઇદં શ્રુત્વા મહાપ્રાજ્ઞઃ નારદો મુનિસત્તમઃ ।
સ્વશિષ્યેભ્યશ્ચ સર્વેભ્યોહ્યુપદેશં કરોતિ સઃ ॥ ૨૧॥

બહવો ઋષયશ્ચેદં જપ્ત્વા ખયફલઙ્ગતાઃ ।
ઇત્યાશ્ચર્યકરન્દિવ્યં કવચં યો જપન્સદા ॥ ૨૨॥

॥ ફલશ્રુતિઃ ॥

સર્વાન્કામાનવાપ્નોતિ વિષ્ણુસાયુજ્યમાપ્નુયાત્ ।
સુન્દરાખ્યસ્ય કવચં યો વા ભૃતકળેવરે ॥ ૨૩॥

ન રોગો ન ભયં ક્વાપિ ન ભૂતપ્રેતબાધકઃ ।
ન શક્યો બાધિતું લોકૈસ્સર્વત્ર વિજયી ભવેત્ ॥ ૨૪॥

મહારણે સભામધ્યે ચોરવ્યાઘ્રસમૂહકે ।
યસ્સ્મરન્સુન્દરભુજં તક્ષણાજ્જયમશ્ ?નુતે ॥   ૨૫॥

વજ્રેણાપિ ન ભિદ્યન્તે હરેનામામૃતાઽપ્લુતાઃ ।
પુત્રાર્થી લભતે પુત્રાન્ધર્માર્થી ધર્મમશ્નુ?તે ॥ ૨૬॥

કામાર્થી કામમાપ્નોતિ ધનાર્થી લભતે ધનાન્ ।
જયાર્થી જયમાપ્નોતિ વશ્યાર્થી વશ્યમાપ્નુયાત્ ॥ ૨૭॥

ન ભયં રાક્ષસેભ્યશ્ચ રોગાર્તો મુચ્યતે રુજઃ ।
રાત્રૌ ચ કવચં જપ્ત્વા દુસ્સ્વપ્નમાદિન્દ્રિયસ્ખલાત્ ॥ ૨૮॥

શ્રીવશ્યં શત્રુવશ્યશ્ચ રાજવશ્યં મૃગાદિભિઃ ।
વાક્સિદ્ધિં કાયસિદ્ધિઞ્ચ મનસ્સિદ્ધિશ્ચ વિન્દતિ ॥ ૨૯॥

સપ્તકોટિમહામન્ત્રં બહુયત્નેન સિદ્ધિદમ્ ।
સુન્દરેશસ્ય કવચં શીઘ્રસિદ્ધિપ્રદં શુભમ્ ॥ ૩૦॥

ઇતિ શ્રીનારદાય બ્રહ્મપ્રોક્તં
શ્રીમત્સુન્દરરાજકવચસ્તોત્રમહામન્ત્રં સમાપ્તિમગાદિતિશમ્ ॥

ૐ તત્સત્ । શ્રીમત્સુન્દરરાજાર્પણમસ્તુ ॥

Proofread by Saritha Sangameswaran

---

*Sundararaja Kavacha Stotram*
pdf was typeset on May 27, 2026

Please send corrections to *sanskrit@cheerful.com*